# shrIgaNeshAvatArastotraM

# શ્રીગણેશાવતારસ્તોત્રમ્

## Document Information

Text title : gaNeshAvatArastotram

File name : gaNeshAvatArastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : mudgalapurANe

Latest update : September 15, 2004

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2020

*sanskritdocuments.org*

# શ્રીગણેશાવતારસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
આઙ્ગિરસ ઉવાચ ।
અનન્તા અવતારાશ્ચ ગણેશસ્ય મહાત્મનઃ ।
ન શક્યતે કથાં વક્તું મયા વર્ષશતૈરપિ ॥ ૧॥

સંક્ષેપેણ પ્રવક્ષ્યામિ મુખ્યાનાં મુખ્યતાં ગતાન્ ।
અવતારાંશ્ચ તસ્યાષ્ટૌ વિખ્યાતાન્ બ્રહ્મધારકાન્ ॥ ૨॥

વક્રતુણ્ડાવતારશ્ચ દેહિનાં બ્રહ્મધારકઃ ।
મત્સરાસુરહન્તા સ સિંહવાહનગઃ સ્મૃતઃ ॥ ૩॥

એકદન્તાવતારો વૈ દેહિનાં બ્રહ્મધારકઃ ।
મદાસુરસ્ય હન્તા સ આખુવાહનગઃ સ્મૃતઃ ॥ ૪॥

મહોદર ઇતિ ખ્યાતો જ્ઞાનબ્રહ્મપ્રકાશકઃ ।
મોહાસુરસ્ય શત્રુર્વૈ આખુવાહનગઃ સ્મૃતઃ ॥ ૫॥

ગજાનનઃ સ વિજ્ઞેયઃ સાંખ્યેભ્યઃ સિદ્ધિદાયકઃ ।
લોભાસુરપ્રહર્તા ચ મૂષકગઃ પ્રકીર્તિતઃ ॥ ૬॥

લમ્બોદરાવતારો વૈ ક્રોધસુરનિબર્હણઃ ।
આખુગઃ શક્તિબ્રહ્મા સન્ તસ્ય ધારક ઉચ્યતે ॥ ૭॥

વિકટો નામ વિખ્યાતઃ કામાસુરપ્રદાહકઃ ।
મયૂરવાહનશ્ચાયં સૌરમાત્મધરઃ સ્મૃતઃ ॥ ૮॥

વિઘ્નરાજાવતારશ્ચ શેષવાહન ઉચ્યતે ।
મમાસુરપ્રહન્તા સ વિષ્ણુબ્રહ્મેતિ વાચકઃ ॥ ૯॥

ધૂમ્રવર્ણાવતારશ્ચાભિમાનાસુરનાશકઃ ।
આખુવાહનતાં પ્રાપ્તઃ શિવાત્મકઃ સ ઉચ્યતે ॥ ૧૦॥

એતેઽષ્ટૌ તે મયા પ્રોક્તા ગણેશાંશા વિનાયકાઃ ।
એષાં ભજનમાત્રેણ સ્વસ્વબ્રહ્મપ્રધારકાઃ ॥ ૧૧॥

સ્વાનન્દવાસકારી સ ગણેશાનઃ પ્રકથ્યતે ।
સ્વાનન્દે યોગિભિર્દૃષ્ટો બ્રહ્મણિ નાત્ર સંશયઃ ॥ ૧૨॥

તસ્યાવતારરૂપાશ્ચાષ્ટૌ વિઘ્નહરણાઃ સ્મૃતાઃ ।
સ્વાનન્દભજનેનૈવ લીલાસ્તત્ર ભવન્તિ હિ ॥ ૧૩॥

માયા તત્ર સ્વયં લીના ભવિષ્યતિ સુપુત્રક ।
સંયોગે મૌનભાવશ્ચ સમાધિઃ પ્રાપ્યતે જનૈઃ ॥ ૧૪॥

અયોગે ગણરાજસ્ય ભજને નૈવ સિદ્ધ્યતિ ।
માયાભેદમયં બ્રહ્મ નિવૃત્તિઃ પ્રાપ્યતે પરા ॥ ૧૫॥

યોગાત્મકગણેશાનો બ્રહ્મણસ્પતિવાચકઃ ।
તત્ર શાન્તિઃ સમાખ્યાતા યોગરૂપા જનૈઃ કૃતા ॥ ૧૬॥

નાનાશાન્તિપ્રભેદશ્ચ સ્થાને સ્થાને પ્રકથ્યતે ।
શાન્તીનાં શાન્તિરૂપા સા યોગશાન્તિઃ પ્રકીર્તિતા ॥ ૧૭॥

યોગસ્ય યોગતા દૃષ્ટા સર્વબ્રહ્મ સુપુત્રક ।
ન યોગાત્પરમં બ્રહ્મ બ્રહ્મભૂતેન લભ્યતે ॥ ૧૮॥

એતદેવ પરં ગુહ્યં કથિતં વત્સ તેઽલિખમ્ ।
ભજ ત્વં સર્વભાવેન ગણેશં બ્રહ્મનાયકમ્ ॥ ૧૯॥

પુત્રપૌત્રાદિપ્રદં સ્તોત્રમિદં શોકવિનાશનમ્ ।
ધનધાન્યસમૃદ્ધ્યાદિપ્રદં ભાવિ ન સંશયઃ ॥ ૨૦॥

ધર્માર્થકામમોક્ષાણાં સાધનં બ્રહ્મદાયકમ્ ।
ભક્તિદૃઢકરં ચૈવ ભવિષ્યતિ ન સંશયઃ ॥ ૨૧॥

ઇતિ મુદ્ગલપુરાણાન્તર્ગતં ગણેશાવતારસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)
and Amith K Nagaraj (amithkn@rediffmail.com)
Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrIgaNeshAvatArastotraM*

pdf was typeset on November 21, 2020

Please send corrections to *sanskrit@cheerful.com*